# बे सरस्वती-स्तोत्र

-सं. मुनि रत्नकीर्तिविजय

विद्यानां तथा श्रुतज्ञाननां अधिष्ठात्री माता सरस्वती देवीनां बे अप्रसिद्ध स्तोत्ररत्नो यथामति संपादित करी अत्रे रजू करतां हर्षानुभव करुं छुं. बालमति छतां पूज्य गुर्वाज्ञाथी दोरवाईने आ साहस कर्युं छे, तेथी बालसुलभ क्षतिओ क्षन्तव्य गणवानी मनीषिजनोने विज्ञप्ति छे. प्रथम स्तोत्रनी बे पत्रनी एक प्रति मळेल छे, जे अनुमानतः १५ मा शतकनी लखायेली जणाय छे. प्रान्ते "जानी मेघेन लिखितम् " एम लेखकनो निर्देश छे, पण संवत्नो, रचना संवत्नो के कर्तानो निर्देश नथी. समग्रपणे स्तोत्रनो भाव तपासतां कोई योगमार्गना साधकनी आ मंत्र-यंत्रनी विशिष्ट आम्नायगर्भित रचना छे, तेम पूज्योथी जाणवा मळ्युं छे. स्तोत्र निःशंक प्रभावपूर्ण लागे छे. छठ्ठा पद्यमांना 'निर्ग्रन्थ' पद परथी कोई जैन कर्तानी रचना होय तो ते असंभवित नथी.

बीजुं स्तोत्र 'जिनवाक्स्तुति" नामे छे. ते मुख्यत्वे जैन आम्नाय प्रमाणेना सरस्वती –श्रुतदेवीना स्वरूपनुं , नामोनुं तथा गुणनुं वर्णन करे छे. ते एक साव नाना प्रकीर्ण पत्रमां लखायेलुं छे, जे पत्र संभवतः १८ मा सैकानुं जणाय छे. एमां पण पत्रमां के रचनामां कर्तानो उल्लेख छे नहि. रचना प्रगल्भ जणाय छे.

१

(श्री शारदायै नमः ॥)

अन्तः कुण्डलिनिप्रसुप्तभुजगाकारस्फुरद्विग्रहां,
शक्तिं कुण्डलिनीं विधाय मनसा हुंकारदण्डाहताम्।
षट्चक्राणि विभिद्य सद्य मनसां प्रद्योतनद्योतनीं,
लीनां ब्रह्मपदे शिवेन सहितामेकत्र लीनां स्तुमः॥१॥

कन्दात्कुण्डलिनि ! त्वदीयवपुषा निर्गत्य तन्तुत्विषा,
किञ्चिच्चुम्बितमम्बुजं शतदलं तद्ब्रह्मरन्ध्रादधः।
यश्चन्द्रद्युति ! चिन्तयत्यविरतं भूयोऽत्र भूमण्डले,
तन्मन्ये कविचक्रवर्तिपदवीच्छत्रच्छलाद्वल्गति॥ २॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यस्त्वद्वक्त्रमृगाङ्कमण्डलमिलत्कान्तिप्रतानोच्छलत,
चञ्चच्चन्द्रकचक्रचित्रितककुप्कन्याकुलं ध्यायति।
वाणी वाणिविचित्रभङ्गुरपदप्रागल्भयशृङ्गारिणी,
नृत्यत्युन्मदनर्त्तकीव सरसं त्वद्वक्त्ररङ्गाङ्गणे॥ ३॥

देवि ! त्वत्पदचन्द्रकान्तकरकश्च्योतत्सुधानिर्झर-
स्नानानन्दतरङ्गितः पिबति यः पीयूषधारारसम्।
तारालङ्कृतचन्द्रशुक्तिकुहरेणाकण्ठमुत्कण्ठितो,
वक्त्रेणोद्गिरतीव तं पुनरसौ वाणीविलासच्छलात्॥ ४॥

क्षुभ्यत्क्षीरसमुद्रनिर्गतमहाशेषाहिलोकात्फणा
पत्रोन्निद्रसितारविन्दकुहरे ! चन्द्रस्फुरत्कर्णिके !।
देवि ! त्वां च निजं च पश्यति वपुर्यः कान्तिभिन्नान्तरं,
ब्राह्मि ! ब्रह्मविदस्य वल्गति वचःप्रागल्भ्यदुग्धाम्बुधे !॥५॥

नाभीपाण्डुरपुण्डरीककुहरे हृत्पुण्डरीके गल-
त्पीयूषद्रक(व)वर्ष(षि)णि ! प्रविशतीं त्वां मात्रिकामालिनीम्।
दृष्ट्वा भारति ! भारती प्रभवति प्रायेण पुंसो यया,
निर्ग्रन्थोऽपि शतान्यपि ग्रथयति ग्रन्थायुतानां नरः॥६॥

त्वां मुक्तामयसर्वभूषणधरां श्वेताम्बराडम्बरां,
गौरीं गौरिसुधां तरङ्गधवलामालोक्य हृत्पङ्कजे।
वीणापुस्तकमौक्तिकाक्षवलयश्वेताब्जवल्गत्करां,
न स्यात्कः शुचिवृत्तचक्ररचनाचातुर्यचिन्तामणिः॥

अश्येत्स्वां तनुमिन्दुमण्डलगतां त्वां चाभितो मण्डितां,
यो ब्रह्माण्डकरण्डपिण्डितसुधाडिण्डीरपिण्डैरिव।
सुस्वच्छेद्गतिगद्यपद्यलहरीलीलाविलासामृतैः,
सानन्दास्तमुपाचरन्ति कवयश्चन्द्रं चकोरा इव॥ ८॥

तद्वेदान्तशिरस्तदोंकृतिमुखं ज्योतिःकलालोचनं,
तत्तद्वेदभुजं तु(त)दात्महृदयं तद्गद्यपद्यांह्रि च।
यस्त्वद्वर्ष्म विभावयत्यविरतं वाग्देवि ! तद्वाङ्मयं,
शब्दब्रह्मणि निष्ठितः स परमब्रह्मैकतामश्नुते॥९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वाग्बीजं स्मर बीजवेष्टितमतो ज्योतिःकलाभृद्बहि-
रष्टद्वादशषोडशद्विगुणितद्विष्टाब्जपत्रान्वितम्।
तद्बीजाक्षरकादिवर्णरचितान्यग्रे दलस्यान्तरे,
हंसः कूड(ट)युतं भवेदवितथं यन्त्रं तु सारस्वतम्॥ १०॥

ॐ ह्रीँ श्रीँ स[ह] ह्रीँ सबीजकलितां वाग्वादिनीदेवतां,
गीर्वाणासुरपूजितामनुदिनं काश्मीरदेशे भवाम्।
अश्रान्तं निजभक्तिशक्तिवशतो यो ध्यायति प्रस्फुटं,
बुद्धिज्ञानविचारसारमहितः स्याद्देव्यसौ साम्प्रतम् ॥११॥

स्मृत्वा यन्त्रं सहस्रच्छदकमलमनुध्याय नाभीहृदोत्थं,
चेतःस्निग्धोर्द्धनालं हृदि च विकचितां बाष्पनिर्यातना स्यात्।
तन्मध्ये चोर्ध्वरूपामभयदवरदां पुस्तकाम्भोजपार्णी(णिं),
वाग्देवीं तन्मुखाच्च स्वमुखमनुगतां चिन्तयेदक्षरालीम् ॥१२॥

किमिह बहुविकल्पैश्चिन्तितैर्यस्य कण्ठे,
लुठति विमलवृत्तस्थूलमुक्तावलीयम्।
भवति भवति नाथे भव्यभाषाविशेषै-
र्मधुरमधुसमृद्धस्तस्य वाचां विशेषः॥१३॥

*

इति श्री भारतीस्तवनं सम्पूर्णम्॥

*

---

**प्रशस्तिः** यदक्षरपरिभ्रष्टं स्वरव्यञ्जनवर्जितम्।
तत्सर्वं क्षमतां देवि ! प्रसीद परमेश्वरि॥

*

जानीमेघेन लिखितम्। सुमतिधीरगणिपठनार्थम्॥ श्री॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

२

**( श्रीमदर्हद्वाण्यै नमः । )**

सर्व्वज्ञवाणी जयतात्सर्वभाषामयी शुभा।
पञ्चत्रिंशद्गुणोपेता मनुपूर्वस्वरूपिणी॥ १॥
दयामय्यमृतमयी वाग्देवी श्रुतदेवता।
संसृष्टिविगमध्रौव्यदर्शिका भुवनेश्वरी॥ २॥
ब्रह्मबीजध्वनिमयी श्रीमती वाग्भवात्मिका।
ज्ञानदर्शनचारित्ररत्नत्रितययदायिका॥ ३॥
अर्हद्वक्त्राब्जसम्भूता भव्यकैरवचन्द्रिका।
नयप्रमाणगम्भीरा नवतत्त्वगमान्विता॥
वाग्वादिनी भगवती कुमतिध्वंसकारिणी।
स्याद्वादिहृदयाम्भोजस्थायिनी मातृकामयी॥ ५ ॥
नित्या सरस्वती सत्या ज्योतीरूपा जगद्धिता।
वागीश्वरी सिद्धिदात्री सिद्धबीजमयी परा॥ ६ ॥
परमैश्वर्यसहिता गणभृद्गुम्फिता श्रुते।
सिद्धान्तार्थप्रदाऽचिन्त्याऽनन्तशक्तिश्च सारदा॥ ७ ॥
स्याद्वादवादिनी श्रेष्ठा तारिणी भववारिधेः।
या हृज्जाड्यान्धकारस्य हरणे तरणिप्रभा॥८॥( अष्टभिः कुलकम् ॥)
सा मद्वक्त्रे निवसताज्ज्ञानानन्दप्रदायिनी।
नमस्या मामकी तस्यै बोभवीतु मुहुर्म्मुहुः॥ ९ ॥

*

## इति श्रीजिनवाक्स्तुतिः ।

श्री प्रवचनदेव्यै नमः। णमो बंभीए लिवीए। णमो सुयदेवयाए भगवईए। णमो सुयस्स भगवओ। श्री ज्योतिर्मायाभ्यां नमः।

स्वामिनि ! शासनदेवते ! म'त्सान्निध्यं विधेहि विश्वेशी।
प्रवचनबोधो भगवति ! दयया भक्ताय दातव्यः॥ १ ॥

श्रीमदर्हन्मातृकाभ्यो नमः॥ श्री जिनशासनदेवताभ्यो नमः॥श्री प्रवचनमातृभ्यो नमः॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org